# ॥ કાલિકાસ્તોત્રમ્ ॥

.. kAlikAstotram ..

sanskritdocuments.org

August 20, 2017

# .. kAlikAstotram ..

# ॥ કાલિકાસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : kAlikAstotram

File name : kAlikAstotram.itx

Category : devii, dashamahAvidyA

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : February 10, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ કાલિકાસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ॥

દધન્નૈરન્તર્યાદપિ મલિનચર્યાં સપદિ યત્
સપર્યાં પશ્યન્સન્ વિશતુ સુરપુર્યાં નરપશુઃ ।
ભટાન્વર્યાન્ વીર્યાસમહરદસૂર્યાન્ સમિતિ યા
જગદ્ધુર્યા કાલી મમ મનસિ કુર્યાન્નિવસતિમ્ ॥ ૧॥

લસન્નાસામુક્તા નિજચરણભક્તાવનવિધૌ
સમુદ્યુક્તા રક્તામ્બુરુહદૃગલક્તાધરપુટા ।
અપિ વ્યક્તાઽવ્યક્તાયમનિયમસક્તાશયશયા
જગદ્ધુર્યા કાલી મમ મનસિ કુર્યાન્નિવસતિમ્ ॥ ૨॥

રણત્સન્મઞ્જીરા ખલદમનધીરાઽતિરુચિર-
સ્ફુરદ્વિદ્યુચ્ચીરા સુજનઝષનીરાયિતતનુઃ ।
વિરાજત્કોટીરા વિમલતરહીરા ભરણભૃત્
જગદ્ધુર્યા કાલી મમ૦॥ ૩॥

વસાના કૌશેયં કમલનયના ચન્દ્રવદના
દધાના કારુણ્યં વિપુલજઘના કુન્દરદના ।
પુનાના પાપાદ્યા સપદિ વિધુનાના ભવભયં
જગદ્ધુર્યા કાલી મમ૦॥ ૪॥

રધૂત્તંસપ્રેક્ષારણરણિકયા મેરુશિખરાત્
સમાગાદ્યા રાગાજ્ઝટિતિ યમુનાગાધિપમસૌ ।
નગાદીશપ્રેષ્ઠા નગપતિસુતા નિર્જરનુતા
જગદ્ધુર્યા કાલી મમ મનસિ-॥ ૫॥

વિલસન્નવરત્નમાલિકા કુટિલશ્યામલકુન્તલાલિકા ।
નવકુઙ્કુમભવ્યભાલિકાઽવતુ સા માં સુખકૃદ્ધિ કાલિકા ॥ ૬॥

યમુનાચલદ્મુના દુઃખદવસ્ય દેહિનામ્ ।
અમુના યદિ વીક્ષિતા સકૃચ્છમુ નાનાવિધમાતનોત્યહો ॥ ૭॥

અનુભૂતિ સતીપ્રાણપરિત્રાણપરાયણા ।
દેવૈઃ કૃતસપર્યા સા કાલી કુર્યાચ્છુભાનિ નઃ ॥ ૮॥

ય ઇદં કાલિકાસ્તોત્રં પઠેત્તુ પ્રયતઃ શુચિઃ ।
દેવીસાયુજ્યભુક્ ચેહ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૯॥

ઇતિ કાલિકાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. kAlikAstotram ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*